# श्रीसत्यज्ञानतीर्थस्तुतिः

ज्ञानसम्पूर्णवाराशिं भक्तिपूरितमानसम् ।
वैराग्यपूतमनसं सत्यज्ञानमहं भजे ॥१॥

शलाकारीतिमाश्रित्य सुधां पद्मावतीस्थले ।
प्रोक्तवन्तं विद्वदग्रे सत्यज्ञानमहं भजे ॥२॥

सदा मारुतसच्छास्त्रपाठप्रवचने रतम् ।
विद्वन्निर्माणकर्तारं सत्यज्ञानमहं भजे ॥३॥

मूलरामं महाभक्त्या पूजयन्तं सविस्तरम् ।
नित्यं सहस्रनामाद्यैः सत्यज्ञानमहं भजे ॥४॥

वेङ्कटेशो यस्य कृते तिलकं न व्यदीधरत् ।
कार्ष्णो न रथ आचालीत् सत्यज्ञानमहं भजे ॥५॥

बह्वाशित्वसमर्थोऽपि लघ्वाशी नियतं च यः ।
गोमयागतभोक्तारं सत्यज्ञानमहं भजे ॥६॥

देहापत्यकलत्रादिष्वसक्तं ब्रह्मनिष्ठया ।
नित्यानित्यविवेकेन सत्यज्ञानमहं भजे ॥७॥

प्राणसंस्थापकं पद्मनाभादिगुरुसन्निधौ ।
राणमहेन्द्रपुरावासं सत्यज्ञानमहं भजे ॥८॥

सत्यधीरकराब्जोत्थं सत्यध्यानोपदेशकम् ।
सत्यध्यानरतं नित्यं सत्यज्ञानमहं भजे ॥९॥

यलगूरे कोरवारे प्राणानुग्रहभाजनम् ।
रङ्गानृसिंहसद्भक्तं सत्यज्ञानमहं भजे ॥१०॥

सत्यात्मभिक्षुरचितं सत्यज्ञानप्रकाशकम् ।
भक्त्या पठन् ज्ञानभक्तिविरक्तीः प्राप्नुयाद् ध्रुवम् ॥११॥

॥ इति श्रीसत्यज्ञानतीर्थस्तुतिः ॥